UTKAL UNIVERSITY
NAAC A+ Accredited

Platinum Jubilee Celebration

1943-2018 and beyond

# Souvenir

# Book of Memories




## UTKAL UNIVERSITY

Bhubaneswar - 751004

संस्कृत





# नमामि वाणीविहारम्

धर्मेन्द्र दासः

उत्कलस्य विद्याभूमिः हृद्या वन्द्या तपोभूमिः ।
विश्वविभूषिता सा तु वाणीविहारसंज्ञिका ।।

प्रवहन्ती सुशिक्षायाः महनीया विद्याधारा
प्लाटिनममहोत्सवे स्मारयति प्रतिक्षणम् ।।

चरित्रनिर्माणस्येयम् अद्वितीया योगभूमिः ।
सर्वलक्ष्यसाधिका च सर्वसुखप्रदायिका ।।

वाणीविहारोत्पन्नाः भुवि ख्याताः शिष्यगणाः ।
नानाकार्ये सुनिपुणाः अद्य सन्ति स्मरणीयाः ।।

एषः विश्वविद्यालयो विश्वजनैः प्रशंसितः ।
नाक् ए प्लस् उपाधिना विमण्डितः सुशोभितः।।

उत्कलीयैः नेतृवर्गैः प्रयत्नेन विनिर्मितः ।
कलेवरः प्रतिष्ठितः ज्ञानमन्दिरसदृशः ।।

विद्यार्थिनां शोधार्थिनां यशोभूता भूमिरियम् ।
सेवकानां शिक्षकाणां श्रमरूपा भूमिरियम् ।।

संस्कृतस्य विभागस्य छात्रः पुरातनस्य च ।
अध्यापकरूपेणाद्य नमामि वाणीविहारम् ।।

Assistant Professor
P.G. Department of Sanskrit
Utkal University, Vanivihar
Bhubaneswar-751004
E-mail ID: das.dharmendra0@gmail.com

# वाणीविहारमुपासितम्

तरुणदलश्चञ्चलं निखिलोत्कलभासितं ।

वाग्देवीपदशोभितं वाणीविहारमुपासितम्।।१ ।।

कृष्णचन्द्रप्रतिष्ठितम् नीलकण्ठगोदाबरीशोभितं ।

राधाकृष्णोद्घाटितं वाणीविहारमुपासितम् ।।२ ।।

पठनपाठनसुखकरं गवेषणोन्मुखश्चञ्चलं ।

पाठ्यकर्मशालातत्परं वाणीविहारमुपासितम् ।।३ ।।

उनत्रिंशविभागमण्ड़ितं भिन्नाभिन्नविषयपाठितं ।

सुपरिसरोद्भासितं वाणीविहारमुपासितम् ।।४ ।।

भिन्नचरित्रसम्मेलम् नुत्नपुरातनयोजनं ।

कथनचलनोपासितं वाणीविहारमुपासितम् ।।५ ।।

संस्कृतसंस्कृतिमेलनं राष्ट्रभावद्योतकं ।

कीर्त्तिऐतिहोल्लासितं वाणीविहारमुपासितम् ।।६ ।।

प्राणकृष्णप्राणपल्लवितं तालपदेश्वरीमन्दिरमण्ड़ितम् ।

उत्कलीयप्राणप्रपञ्चितम् वाणीविहारमुपासितम् ।।७ ।।

प्राक्तनार्वाचीनछात्रमेलनं स्मृत्वानवनवोन्मेषमोदकं

सत्यं परं धीमहीति घोषणं वाणीविहारमुपासितम् ।।८ ।।

ऐतिहासिकगाथावाहकं संस्कृतविभागमण्ड़ितं ।

शास्त्रपरम्पराधारकं भूक्तिमुक्तिप्रदायकं ।।९ ।।

वाणीविहारमुपासितम् ।। वाणीविहारमुपासितम् ।।

सुजितमिश्रः, अध्यापकः, रमादेवी महिला महाविद्यालयः

# मम प्रियः विश्वविद्यालयः

**Sasmita Das**
*Research Scholar*
*P.G. Dept. of Sanskrit*
*Utkal University, Vani Vihar*
*Bhubaneswar - 751004*


समग्रेऽस्मिन् भारतवर्षे स्थितेषु बहुषु विश्वविद्यालयेषु मम प्रियः भवति उत्कलविश्वविद्यालयः। विश्वविद्यालयोऽयं ओडिशाप्रदेशस्य सर्वप्राचीनः तथा सर्ववृहत् विश्वविद्यालयः यस्य प्रतिष्ठा अभवत् 1943 तमे वर्षे। अस्य विश्वविद्यालस्य ध्येयवाक्यं (Motto) भवति 'सत्यं परं धीमहि' यस्य इंराजी-अर्थः भवति 'Seek the highest truth' । इदानीं विश्वविद्यालयस्यास्य कुलाधिपतयः भवन्ति ओडिशाप्रदेशस्य माननीयाः राज्यपालाः प्रो. गणेशीलाल्महोदयाः। तथैव कुलपतयः भवन्ति प्रो. सौमेन्द्रमोहनपट्टनायकमहोदयाः। इदानीमस्मिन् विश्वविद्यालये सप्तविंशतिः (27) विभागाः (Departments) सन्ति। तेषु विभागेषु अस्माकं संस्कृतविभागः अनन्यः अन्यतमश्च। अस्मात् विभागात् बहवः छात्राः समग्रे भारतवर्षे भारतात् बहिरपि कार्यरताः अवस्थापिताश्च सन्ति। अस्माकं संस्कृतविभागात् अनेके अध्यापकाः विदेशे अध्यापयन्ति स्म पुनश्च विभिन्नेषु विश्वविद्यालयेषु कुलपतिरूपेण कार्यनिर्वाहं कृतवन्तः इदानीमपि कुर्वन्ति च। एवंभूते गारिमामयसंस्कृतविभागे मम स्नातकोत्तरशिक्षा (Post Graduation) समाप्ता तदनन्तरं M.phil अपि समाप्ता जाता। इदानीमहम् उत्कलविश्वविद्यालयस्य संस्कृतविभागस्य शोधछात्रा (Research Scholar) अस्मि। छात्रछात्राणां कृते उत्कलविश्वविद्यालयः सर्वदैव प्रेरणायाः उत्सः इव तिष्ठति। अत्र न केवलं पाठ्यक्रमाः पठ्यन्ते अपितु विभिन्नावसरे आलोचनाचक्राणि (Seminars), कार्यशालाः (Workshops, Symposium) इत्यादयः सर्वदा प्रचल्यन्ते छात्रान् अग्रे प्रेरितुम्।

2009 वर्षतः अद्यावधि अत्र मम अध्ययनकाले बहवः पाठ्यसहयोगिकार्यक्रमाः (Cocurricular Activities) अनुष्ठीयन्ते। तदवलोक्य तत्र प्रत्यक्षरूपेण अंशं गृहीत्वा अहं सर्वदा अग्रेसरितुं जीवनस्य लक्ष्यं च प्राप्तुम् उत्साहिता भवामि। मम स्नातकोत्तरशिक्षासमये 2011 तमे वर्षे अत्र उत्कलविश्वविद्यालयस्य संस्कृतविभागपक्षतः एका आन्तर्जातीया सम्मिलनी (International Conference) आयोजिता आसीत्। सा भवति International Conference on Holistic Health and Yogic Practices in the Vedic and Later Sanskrit Texts, (From 14th – 17th March, 2011) । अहमपि अस्मिन्नवसरे प्रत्यक्षतया अंशं गृहीतवती यद्यपि तदाहं स्नातकोत्तरछात्रा आसीत्। अस्य कारणं भवति अस्माकं संस्कृतविभागस्य मम सर्वे गुरवः, ते तु सर्वदा सर्वथा च अग्रेसरितुं प्रेरयन्ति स्म। तेषां गुरूणां प्रेरणा अद्यावधि मां प्रेरयति परोक्षरूपेण। पुनश्च अस्माकं विभागपक्षतः 2011 तमे वर्षे एकं जातीय-आलोचनाचक्रमपि आयोजितं तत् भवति National Conference on Srikshetra and Sri Jagannath in the Purana Literature, (From 29th – 30th October, 2011) । पुनश्च 2012 तमे वर्षे संस्कृतविभागपक्षतः एका जातीयसंगोष्ठी आयोजिता आसीत् सा भवति National Seminar on Thinkers of Yoga down the Ages, (From 24th – 25th March,

2012) । पुनश्च 2013 तमे वर्षे अस्माकं विभागपक्षत: एकं जातीय-आलोचनाचक्रं समायोजितं तत् भवति National Seminar on Modern Sanskrit poetry of odisha, (From 15th – 16th March, 2013)। पुनश्च 2016 तमे वर्षे एका आन्तर्जातीया संगोष्ठी आयोजिता आसीत् अस्माकं विभागपक्षत: सा भवति International Seminar on Yoga and Life Style Management, (From 5th – 6th February, 2016) । पुनश्च 2016 तमे वर्षे उत्कलविश्वविद्यालपक्षत: सप्तविंशतिविभागानां शोधछात्राणां कृते Utkal University Research Scholars, Conclave ( 30thApril, 2016) आयोजितम्। तत्र शोधछात्रारूपेण अहमपि अंशं गृहीतवती तथा Poster माध्यमेन मम शोधविषयमपि उपस्थापितवती। तस्मिन् कार्यक्रमे स्नातकोत्तर-इंराजी-विभाग:, स्नातकोत्तर-ओडिआ-भाषा-साहित्य-विभाग:, स्नातकोत्तर-संस्कृतविभाग: इति विभागत्रयेषु शोधछात्रेषु छात्रासु च अहं प्रथमस्थानम् अधिकृतवती तदानीन्तन-उच्चशिक्षामन्त्रिणा पुरस्कृता अपि अभवम्। एतस्य श्रेय: प्राप्तुमर्हन्ति मम विभागस्य सर्वे गुरव: ये तु मां प्रेरितवन्त: उत्साहितवन्तश्च । पुनश्च 2017 तमे वर्षे अस्माकं विभागपक्षत: एका जातीयसंगोष्ठी आयोजिता आसीत् । सा भवति National Mission for Manuscripts Sponsored National Seminar on “Contribution of Odisha to Sanskrit Manuscripts: 1801 – 1950”. (From 25th – 27th December, 2017) । पुनश्च 2019 तमे वर्षे एका कार्यशाला अनुष्ठिता जाता सा भवति Workshop on “A Compendium of Ancient Educational Thoughts in Sanskrit”, Sponsored by NCERT, New Delhi, (From 29th October to 1st November 2019).

उक्तेषु सर्वेषु कार्यक्रमेषु अहं प्रत्यक्षरूपेण अंशग्रहणं कृतवती। मम विभागस्य ये गुरव: आसन् ये तु इदानीमपि सन्ति ते तु सर्वदैव प्रेरणाया: उत्सा: भवन्ति। अस्माकं उत्कलविश्वविद्यालय: एक: ऐतिह्यसंपन्न: विश्वविद्यालय:। अस्य विश्वविद्यालयस्य छात्रारूपेण अहम् आत्मानं धन्या मन्ये। अद्यावधि अहं यां काञ्चिदपि सफलतां प्राप्ताऽस्मि तस्य श्रेय: केवलं मम विश्वविद्यालयस्य। मम जीवनस्य सर्वश्रेष्ठलक्ष्यपूरणार्थं मम विश्वविद्यालय:, तत्रत्य स्नातकोत्तर-संस्कृत-विभाग:, तत्रत्या: गुरव: सर्वदैव: अविस्मरणीया: आसन् सन्ति भविष्यन्ति इत्यत्र नास्ति कश्चित् सन्देह:।

———o———



# उत्कलविश्वविद्यालय: मम छात्रजीवनस्य आधारस्तम्भ:

**Udaya Kumar Nayak**
*Research Scholar*
*P.G. Dept. of Sanskrit*
*Utkal University, Vani Vihar*
*Bhubaneswar - 751004*

समग्रेऽस्मिन् भारतवर्षे विद्यमानेषु प्रदेशेषु अस्माकम् ओडिशा-प्रदेश: अन्यतम:। अस्मिन् ओडिशाप्रदेशे विद्यमानेषु विश्वविद्यालयेषु अस्माकम् उत्कलविश्वविद्यालय: सर्वप्राचीन: सर्ववृहत् च । ऐतिह्यसंपन्न: उत्कलविश्वविद्यालय: न केवलं भारतवर्षे अपितु समग्रे विश्वे सुपरिचित:। एतादृशे विश्वविद्यालये अध्ययनं मम एक: स्वप्न: आसीत् एकदा। यतो हि मम अग्रज: अत्र भौतिकविज्ञान-विभागे अधीतवान्। मम एतादृश: स्वप्न: वास्तवतां संप्राप्त: 2009 तमे वर्षे। तदारभ्य इदानीं यावत् अर्थात् 2009 वर्षत: आरभ्य 2019 वर्षं यावत् उत्कलविश्वविद्यालयेन साकं कदाचित् प्रत्यक्षरूपेण कदाचित् परोक्षरूपेण मम शैक्षिकसम्बन्ध: वर्त्तते। मम स्नातकोत्तरशिक्षासमये (2009-11) अस्माकं संस्कृतविभागस्य विभागमुख्या: आसन् प्रो. प्रफुल्लकुमारमिश्रमहोदया:। ते तु इदानीं ड: राजेन्द्रप्रसाद-केन्द्रिय-कृषि-विश्वविद्यालये कुलाधिपतय: सन्ति। तदा अस्माकं विभागे प्रो. गोपालकृष्णदाश:, प्रो. राधामाधवदाश:, प्रो. रघुनाथपण्डा, प्रो. प्रतिभामञ्जरीरथ:, प्रो. सुवाषचन्द्रदाश:, ड:. दीनबन्धुत्रिपाठी, ड:. पराम्बाश्रीयोगमाया विराजन्ते स्म। तदा छात्राणां विभागस्य च अनुरोधेन पूर्वतनविभागमुख्या: तथा श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य पूर्वतनकुलपतय: प्रो. अलेखचन्द्रषडङ्गीमहोदया: अपि अत्रागत्य अस्मान् स्वत:प्रवृत्तरूपेण व्याकरणम् अध्यापितवान्। प्रो. सिद्धेश्वरजेनामहोदया: अपि अस्मान् पाठितवन्त:। यदा अहं स्नातकोत्तरसंस्कृतविभागस्य पाठ्यचक्रसंपादक: (Seminar Secretary) आसीत् तदा अस्माकं विभागस्य छात्र-उपदेष्टा-प्रो.-सुवाषचन्द्रदाशमहोदया: अनेकस्मिन् समये विभिन्नपरिस्थितिसु च समुचितमार्गदर्शनं कारयन्ति स्म। मम विभागस्य सर्वे गुरव: सर्वदा अग्रेसरितुं प्रेरितवन्त:। एकदा मम य: स्वप्न: आसीत् यत् उत्कलविश्वविद्यालये एव अध्ययनं तत् साकारं भवति यतो हि अत्र एव प्रो. राधामाधवदाशमहोदयस्य प्रत्यक्षतत्त्वावधानेन मम M.Phil समाप्त: अनन्तरं Ph.d इदानीं प्रचलति। अहम् उत्कलविश्वविद्यालयस्य शोधछात्ररूपेण गर्वित:। उत्कलविश्वविद्यालय: मम छात्रजीवनस्य आधारस्तम्भ: इति वक्तुं शक्नोमि ।

————०————



# स्मृतिः पुरातनी पुण्या

प्रोफेसर् सदाशिव प्रहराजः
(प्राप्तस्वर्णपदकः)
पूर्वतन - संस्कृतप्राचार्यः महामान्य राष्ट्रपतिसम्मानितश्च
देहरिपाली , सम्बलपुरम्

## कटके उत्कलविश्वविद्यालयः
## संस्कृतादिविभागत्रयम्

### (क)

श्री भुवनेश्वरौ वन्दे देवान् देवीश्च सादरम् ।
सर्वविद्याप्रदातारौ वन्दे वाणीगणेश्वरौ ।। १ ।।
वाणीं विद्याप्रदां वन्दे शुभ्रवस्त्रां सरस्वतीम् ।
हंसे पद्मे समासीनां वीणापुस्तकधारिणीम् ।। २ ।।
स्मृतिः पुरातनी पुण्या जायते मानसे मम ।
पूर्वं पठनकालस्य स्नातकोत्तरसंस्कृते ।। ३ ।।
कटके तु तदा चासीद् (उत्कल)विश्वविद्यालयो वुधाः ।
महानद्यास्तु वै पार्श्वे चास्य कार्यालयः पुनः ।। ४ ।।
वैज्ञानिकाः प्रसिद्धा ये (डः)श्री प्राणकृष्णविश्रुताः ।
परिजोपाह्व सम्पन्नाः कुलपतय एव ते ।। ५ ।।
रथोपाह्वाः सुविश्रुता गोराचान्दमहोदयाः ।
कुलसचिवा एवासन् स्वकर्त्तव्यपरायणाः ।। ६ ।।
विश्वविद्यालयस्यासन् विभागास्त्रय एव वै ।
दर्शनं संस्कृतं चार्थ(नीतिः) रेभेन्सा समीपे पुनः (वर्द्धमानकोठि) ।। ७ ।।
संस्कृतस्य विभागस्य ( १ ९ ५ ७-५ ८ ) वर्षे प्रारम्भ एव वै ।
वर्षे तस्मिन् वुधाः शिष्याः पञ्च षट् वा स्मराम्यहम् ।। ८ ।।
परवत्तिनी वै वर्षे ( १ ९ ५ ८-५ ९ ) छात्रश्चाहं वुधाः पुनः ।
वयं तथैव पञ्च वा शिष्याः षड् वै स्मराम्यहम् ।। ९ ।।
वुधाः ! ( अतिथि) प्राचार्यरूपेण चार्त्तवल्लभा एव वै ।
महान्ति करोपाह्वास्ते करुणाकरा एव ते ।। १ ० ।।
(नियमितभावेन) प्रधानास्ते च प्रह्लादाः प्राचार्या वुधा ! एव ते ।

(ङ:) अनाम (स्वाइँ) स्वामिनो वुधा: प्राध्यापकास्तु ते पुन: ।। ११ ।।
(ङ:) सावित्री (राउत) देव्यो वै चाध्यापिकास्तु वै तदा ।
ते सर्वे गुरवो विज्ञा मान्या: स्वर्गता एव वै ।। १२ ।।

(ख)

## भूवनेश्वरे उत्कलविश्वविद्यालय:

वर्षे (१९६१) विश्वविद्यालयश्चायं राजते भुवनेश्वरे ।
विपुलं चैव स्थानं वै भवनानि च प्राप्तवान् ।।
वाणीविहार नाम्ना तु स्थानं वै नामितं वुधा: ।। १३ ।।
कार्यालयं गृहं चैव सुविशालं सुसज्जितम् ।
भवनं कुलपतेर्गृहं चैव प्राचार्यभवनानि वै ।।
प्राध्यापकगृहाण्येव चाध्यापकगृहं तथा ।।१४ ।।
कर्मचारी-गृहाण्येव वहुविधानि सन्ति वै ।
निवसन्ति च सुखेन सर्वे सानन्दमेव ते ।। १५ ।।
छात्रावासास्त्रयो विज्ञा-छात्रीनिवास एव वै ।
निवसन्ति च सुखेन सानन्दं सर्व एव ते ।। १६ ।।
विभागा ननु वै त्रिंशद् विश्वविद्यालये तथा ।
शिष्या: खलु पठन्त्येव तेषु च वहुसंख्यया ।। १७ ।।
ग्रन्थागारं विशालं वै परिजानामशोभितम् ।
वहुतलविशिष्टं तद् वहु पुस्तकमण्डितम् ।। १८ ।।
गुरुणां चैव शिष्याणां वहुधा चोपकारकम् ।
पठनभवने शिष्या: पठन्त्येव तु वै वुधा: ।। १९ ।।
(मुख्य) प्रवेशमार्गयोर्मध्ये वाण्यामूर्त्तिस्तु स्थापिता ।
सुविशाला च पाषाणी मनोहारिणी सैव वै ।। २० ।।
यस्या वाण्यास्तु वै नाम्ना वाणीविहारो नामित: ।
मुक्ताकाशे तु सा देवी वुधास्तिष्ठति सर्वदा ।। २१ ।।
आवरणं यतो नास्ति देव्या उपरि सज्जना: ।
वृष्टिं वातं तथा तापं शैत्यं सा सहते सदा ।। २२ ।।

(ग)

## वाणीविहारो मम प्रथमं कर्मक्षेत्रम्

परिभाषा विभागे वै विश्वविद्यालयस्य च ।

कर्त्तृपक्षैर्नियुक्तोऽहं गवेषणासहायक: ।। २३ ।।

उद्भिदां-प्राणिनाञ्चैव (विज्ञानानां) मनसतु तथा वुधा: ।

(शब्द) अर्थ निरूपणार्थं च मातृभाषया एव वै ।। २४ ।।

उद्भिदविज्ञानस्य (Botany) प्राणीविज्ञानस्य (Zoology) मनोविज्ञानस्य (Psychology Technical terms) जटिलशब्दानाम् (Technical terms) उत्कलभाषया अर्थनिरूपणार्थं विषयसमितय: आसन् । विषयाणां प्राचार्या: अन्ये विद्वासंश्च समागत्य उत्कलभाषया अनुवादं कृतवन्त: । उद्भिदविज्ञानविषये स्वयं (ड:) प्राणकृष्णपरिजामहोदया: प्राणीविज्ञाने प्राचार्या: वसन्तकुमारवेहुरामहोदया: मनोविज्ञाने ड: राधानाथरथमहोदया: समागत्य शब्दानामनुवादं कृतवन्त:। अनुवादकरणे भाषादृष्ट्या व्याकरणदृष्ट्या च तेषामहं सहायतां कृतवान् । १९६१ तम वर्षस्य सम्भवत: जुलाइमासादारभ्य १९६२ तम वर्षस्य नभेम्बरमासं यावदहं कार्यं कृतवान् । वासभवनमहं तत्र प्राप्तवान् । ततोऽध्यापकरूपेण नियुक्तिं प्राप्य २२/११/१९६२ दिवसे पुर्यां सामन्तचन्द्रशेखरमहाविद्यालये संस्कृताध्यापकरूपेण योगदानं कृतवान् ।

(घ)

**उपसंहार:**

पञ्चसप्ततिवर्षाणि विश्वविद्यालयस्य वै।

पूर्णानीति जयन्तीं वै हीरकस्यैव पाल्यतै ।। २५ ।।

सर्वेषां देवदेवीनामाशीर्वादेन भूयसा ।

विश्वविद्यालयश्चायं वद्धतामुत्तरोत्तरम् ।। २६।।

********

